# गुरुः – आचार्यः उपाध्यायः

गुरुः –

गुशब्दस्त्वन्धकारस्स्यात् रुशब्दस्तन्निवारकः ।

अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते ॥ निरुक्तपरिभाषा

गुरुरुपायः – शिवसूत्रम् **, 2-6**

गृणाति उपदिशति तात्त्विकमर्थम् इति गुरुः । शिवसूत्रविमर्शिनी

निषेकादीनि कर्माणि यः करोति यथाविधि ।

संभावयति चान्नेन स विप्रो गुरुरुच्यते ॥ मनुस्मृतिः **, 2-142** (निषेकः = गर्भाधानम् ) ।

गृणाति धर्मादि । गिरत्यज्ञानं वा । गॄ शब्दे (क्र्यादिः) गॄ निगरणे (तुदादिः) वा । कृग्रोश्च ( उणादिः 1-24) इति उः । अमरः

गुरू गीष्पतिपित्राद्यौ – अमरः **, नानार्थवर्गः , 163**

उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः ।

मातुलः श्वशुरस्त्राता मातामहपितामहौ ॥

वर्णज्येष्ठः पितृव्यश्च पुमांसो गुरवः स्मृताः ।

माता मातामही गुर्वी पितुर्मातुश्च सोदराः ॥

श्वश्रूः पितामही ज्येष्ठा भगिनी गुरवः स्त्रियः। कूर्मपुराणम्

शुश्रूषस्व गुरून् – अभिज्ञानशाकुन्तलम् **- 4**

आचार्यः ---

मन्त्रव्याख्याकृदाचार्यः – अमरः **, 2-**ब्रह्मवर्गः **– 7**

उपनीय तु यश्शिष्यं वेदमध्यापयेद्द्विजः ।

सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥ मनुस्मृतिः , 2-140

आचार्यः कस्मात् ? आचार्य आचारं ग्राहयति , आचिनोति अर्थान् , आचिनोति बुद्धिमिति वा

--निरुक्तम् **, 1-2-4**

आचिनोति च शास्त्रार्थम् आचारे स्थापयत्यपि ।

स्वयमाचरते यस्मात् आचार्यस्तेन चोच्यते ॥ वायुपुराणम् **, 59-30**

उपाध्यायः **( who teaches by taking money for livelihood )** –

एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः ।

यो'ध्यापयति वृत्त्यर्थम् उपाध्यायः स उच्यते ॥ मनुस्मृतिः **, 2-141**

उपाध्यायान् दशाचार्यः आचार्याणां शतं पिता ।

सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते ॥ मनुस्मृतिः **, 145**

**Therefore** मातापितरौ **,** पार्वतीपरमेश्वरौ **,** सीतारामौ **- '** अभ्यर्हितं च **'** वार्तिकम् **,** पा सू अल्पाच्तरम् **2-2-34 .** गर्भधारणपोषाभ्यां पितुर्माता गरीयसी **–** स्मृतिः ।

सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके ।

सूत्रं योनिरिहार्थानां सर्वं सूत्रे प्रतिष्ठितम् ॥ तन्त्रवार्तिकम् **, 2-3-6-16**

**See attachment –** महाभाष्यम् **, '** न मु ने **'** पा सू **8-2-3**

***********************************************************************************